Postal Regd.No. GAMC- 1553/2025-2027

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २३३
सप्टेम्बर - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### मानवानां मण्डूकीकरणम्

विश्वस्तरीयाः विज्ञानिनः चिकित्साक्षेत्रे नूतनान् आविष्कारान् महता प्रमाणेन कुर्वन्ति इति वयं जानीमः एव। तदर्थं ते विविधान् प्रयोगान् अपि कुर्वन्ति । नैके निगमाः (company) प्रयोगशालासु कोटिशः पशु-पक्षिणां प्राणैः क्रीडन्ति । भारतात् अपि वानराः प्रेष्यन्ते । केवलं परीक्षणार्थं तेषां हननं भवति । वानराणां शरीररचना महता अंशेन मानवसदृशी वर्तते । अतः निर्मितम् औषधं मानवशरीरे लाभं कर्तुम् अर्हति न वा इति निष्कर्षं प्राप्तुं वानराणां चयनं क्रियते । तत्र मण्डूक-मूषकादीनां सङ्ख्या न्यूना नास्ति । केषाञ्चित् दुःसाध्य-रोगाणां संवीक्षणाय क्वचित् पशुवधः अनिवार्यः एव इति वयम् अङ्गीकुर्मः कथञ्चित्, परन्तु चिकित्सा-प्रयोगस्य (clinical trials) नाम्ना, मानवशरीरे अपि प्रयोगाः क्रियन्ते इति अक्षम्यम् एव।

एते प्रयोगाः दुर्बुद्धीनां शासकानां वरदानेन महता प्रमाणेन प्रवर्तन्ते । परिणामतः जगति बहवः जनाः प्रयोगैः नष्टदेहाः भवन्ति।

औषधनिर्मातारः रुग्णस्य शरीरे, नूतनस्य औषधस्य स्पर्शं (effect) ज्ञातुं नानादेशेषु परीक्षणं कुर्वन्ति । तत्रापि अमेरिका प्रथमे क्रमे तिष्ठति। भारते अपि परीक्षणस्य व्याप्तिः वेगेन वर्धते। एतत् परीक्षणं पशुषु क्रियते एव, परं बहुत्र मनोरोगपीडितेषु, हृदयरोगत्रस्तेषु, दरिद्रेषु रोगिषु वा क्रियते। वयं जानीमः एव यत् ३०% भारतीयाः जनाः दरिद्राः सन्ति । चिकित्सायाः विकटं व्ययं सोढुम् अशक्ताः जनाः भारते न्यूनाः न सन्ति । औषधनिर्मातॄणां क्रूरदृष्टिः एतेषु विवशेषु जनेषु विशेषतः पतति । एतेषां रुग्णानां चिकित्साव्ययम् औषधनिगमः (Pharma company) स्वयं निर्वहति । (कारणं स्पष्टम् एव । निगमः औषधस्य परीक्षणं कर्तुम् इच्छति ।) रोगिषु औषधस्य मात्रा यथाकालं परिवर्त्यते, ततः च परिणामः परीक्ष्यते। विशेषज्ञैः औषधनिर्माणे आवश्यकं परिवर्तनं क्रियते। परिवर्तितम् औषधं पुनः दरिद्रेषु, रुग्णेषु परीक्ष्यते । एवं दीर्घकालीनायाः प्रक्रियायाः अन्ते औषधनिगमः स्वीयम् औषधं विक्रयणोचितं प्रतिपाद्य, तत् विक्रेतुम् अनुमतिं लभते । परन्तु तत्पूर्वं प्रयोगावस्थायां मण्डूकभूताः सामान्याः मनुष्याः कां गतिं प्राप्नुवन्ति इति न विचार्यते। अल्पेन रोगेण पीडिताः अपि केचन जनाः आजीवनं पीडाग्रस्ताः भवन्ति। एवं बहवः कुटुम्बाः नश्यन्ति। भगवद्गीतायाम् अर्जुनः वदति- 'अहो बत महत्पापं कर्तुं व्यवसिता वयम्!'

## प्रियः राजा प्रत्यागतः

चोलदेशे मङ्गलापुरं नाम राज्यम् आसीत्। तं देशं राजरत्नः नाम राजा पालयति स्म। सः श्रेष्ठः राजा आसीत्। प्रजानां हितम् एव तस्य शासने प्राधान्यं वहति स्म। अतः तदीयं राज्यं शान्तिपूर्णम् आसीत्। तस्य राज्ये प्रजाः सुखेन वसन्ति स्म। तस्य देशस्य भूमिः अपि फलवती एव आसीत्। अतः देशे फलसमृद्धिः अपि उत्तमा भवति स्म। प्रजाभिः यः करः दीयते तेन राज्ञः कोषः पूर्णः आसीत्। राजरत्नः दानशीलः आसीत्। अतः सः प्रजाभ्यः भूरि धनानिकं ददाति स्म। कुशलकर्मिणः, शिल्पिनः, कवीन् च विशेषतः प्रोत्साहयति स्म सः।

राजरत्नस्य अनुजः मणिरत्नः। अग्रजः कोषस्य सम्पत्तिं व्ययीकरोति यत् ततः सः नितरां खिन्नः भवति स्म। 'यदि अग्रजः कोषस्य सम्पत्तिम् एवमेव व्ययीकुर्यात् तर्हि तदीयस्य मरणस्य अनन्तरं मया राजत्वं यदा प्राप्स्यते तदा मया किमपि न प्राप्येत' इति चिन्ता आसीत् तस्य। यथा यथा दिनानि गतानि तथा तथा मणिरत्नस्य आशा अवर्धत सः अचिन्तयत्– 'यावत् अग्रजः प्रत्यागतः इहलोके स्थास्यति तावत् तदीया दानप्रवृत्तिः निवारिता न भविष्यति' इति। किन्तु मारणरूपम् अपराधं स्वयं कर्तुं सिद्धः न आसीत् सः।

अतः एतदर्थं सः योग्यस्य सहायकस्य अन्वेषणम् आरब्धवान्। राज्ञः आत्मीयेन केनचित् एतत् कार्यं कारणीयम् इति चिन्तनम् आसीत् तस्य। राज्ञः पाचकः तेन सूचितः – 'भोजने विषयोजनेन राजा मार्यताम्' इति। किन्तु पाचकः अवदत् – ''राज्ञा सह अतिथयः सदा भवन्ति एव भोजनावसरे। यदि कदाचित् अजागरूकतावशात् विषमिश्रितम् अन्नादिकम् अन्येन प्राप्येत तर्हि मम प्राणाः निर्गच्छेयुः। अतः एतादृशं कुकृत्यम् अहं न करिष्यामि'' इति। अन्ते मणिरत्नः प्रभूतस्य धनस्य आशां प्रदर्श्य राजक्षौरिकम् एतस्मिन् कार्ये नियोजितवान्। अनन्तरदिने राज्ञः मुखक्षौरं कुर्वन् नापितः आकस्मिकताम् अभिनयन् छुरिकां राज्ञः वक्षसः उपरि पातितवान्। किन्तु राजा ततः न व्रणितः। सः क्षणकालं मौनेन अतिष्ठत्।

भीतः नापितः आत्मीयानां केषाञ्चित् आस्थानिकानां पुरतः स्वस्य अपराधम् अङ्गीकृत्य मणिरत्नस्य कुतन्त्रम् अपि प्रकाशितवान्। मणिरत्नतः धनस्वीकारं सः निराकृतवान् अपि। अनतिकाले एव मणिरत्नेन आचरितं दुष्कृत्यम् आस्थानिकैः सर्वैः ज्ञातम्। राजा मणिरत्नं कठोरतया दण्डयेत् इति सर्वैः चिन्तितम् आसीत्। आश्चर्यं नाम राज्ञा तथा न कृतम् एव। प्रत्युत सः सभायाम् अघोषयत् – ''राज्यभारं निरन्तरं निर्वहता मया नितरां परिश्रान्तम् अस्ति। अतः अहम् अरण्यं गत्वा तपः चरितुम् इच्छामि। मम सहोदरः इतः परं राज्यभारं निर्वक्ष्यति'' इति।

'एतादृशी मूर्खता न उचिता' इति बहवः आस्थानिकाः राजरत्नं बहुधा अबोधयन्।

''वस्तुतः राज्यमोहेन मम अत्र स्थितिः एव मूर्खताद्योतिका'' इति उक्त्वा अनुजम् आनाय्य स्वशिरसि स्थितं किरीटं तस्य शिरसि स्थापितवान् राजरत्नः। न आसीत् पट्टाभिषेकोत्सवः मणिरत्नस्य सिंहासनारोहणं निमित्तीकृत्य। न वा आसीत् आप्रच्छन–समारम्भः अरण्यं प्रति राजरत्नस्य गमनं निमित्तीकृत्य। अनन्तरदिने एव राजरत्नेन अरण्यं प्रति निर्गतम्। अग्रजविषये मणिरत्नेन कृतः अनुचितः व्यवहारः सर्वैः ज्ञातः आसीत् एव। प्रजानां विषये मणिरत्नस्य प्रीतिः अपि न आसीत्। तथापि सर्वे मौनेन स्थितवन्तः। यतः अन्या गतिः न आसीत् तेषाम्।

मणिरत्नः सिंहासनप्राप्त्या कानिचन दिनानि सन्तोषेण अतिष्ठत्। जनाः आस्थानिकाः वा तदीयस्य मुखस्य दर्शने अधिकतया उत्साहिनः न आसन्। एतदपि उचितम् एव इति अचिन्तयत् मणिरत्नः। सः प्रकोष्ठे एव तिष्ठन्

अधिककालं यापयति स्म । गच्छता कालेन तस्य मनसि विचारः आगतः यत् अग्रजस्य मारणाय मया यथा गुप्ततया प्रयासः कृतः तथैव अग्रजपक्षपाती कोऽपि मम मारणाय अपि उपायं चिन्तयन् स्यात् इति। राजरत्नः यद्यपि अरण्ये वसन् ध्यानादिषु मग्नः आसीत् तथापि मणिरत्नः अचिन्तयत् यत् यावत् मम अग्रजः जीविष्यति तावत् मम निश्चिन्तता न भवेत् इति। अतः सः उद्घोषितवान् यत् अहं यत् वदामि तत् यः करोति तस्मै मया अर्धराज्यं दास्यते इति। किन्तु कोऽपि तेन सूच्यमानं कार्यं कर्तुम् उत्सुकः न जातः। कदाचित् कश्चन कविः आस्थानम् आगतः। राजरत्नस्य निर्गमनस्य अनन्तरम् राजास्थानं प्रति कवीनां गमनागमनं कविताश्रावणं च पूर्णतः स्थगितम् एव आसीत्। कविः मणिरत्नं नमस्कृत्य कवितापठनाय अनुज्ञाम् अयाचत। तदा मणिरत्नः अवदत् – "भवतः कवितायाः श्रवणे मम न कापि इच्छा। यदि भवान् धनम् इच्छेत् तर्हि अरण्यं गत्वा मम अग्रजस्य शिरः आनयेत्। तदा राज्यस्य अर्धभागः एव दास्यते मया" इति।

कविः पुनः तत्र क्षणं यावत् अपि न अतिष्ठत्। सः अरण्यं प्रति वेगेन अगच्छत्। किन्तु तत्र गच्छतः तस्य उद्देशः अन्यः एव आसीत्। सः अरण्यं गत्वा राजरत्नं दृष्ट्वा राजास्थाने यद्यत् प्रवृत्तं तत्सर्वम् अश्रावयत्। पूर्वं कीदृशी स्थितिः आसीत्, इदानीं च का स्थितिः इति महता विषादेन व्यवृणोत् सः। सर्वं श्रुत्वा महान्तं खेदं प्रकटयन् स्वस्य असहायकतां च प्रदर्शयन् राजरत्नः अवदत् – "एतस्यां स्थितौ अहं भवते किमपि दातुं न अर्हामि। तथापि चिन्ता करणीया नास्ति भवता। अत्रास्ति मम खड्गः। एतेन मम शिरः छिद्यताम्। तत् नीत्वा मणिरत्नाय दत्त्वा अर्धराज्यं प्राप्यताम्" इति। तदा कविः अवदत् – "एतत् नृशंसं कार्यम् अहं कथं कुर्यां महाराज। पत्नीपुत्रादिभिः सह उपवासेन मरणम् अपि प्राप्तुम् अहं सिद्धः, न तु एतादृशं घोरम् अकृत्यं कर्तुम्। कृपया अहं क्षन्तव्यः" इति।

ततः सः गृहं गत्वा अरण्ये प्रवृत्तं सर्वं पद्यरूपेण विलिख्य तत् पत्रं मणिरत्नाय प्रेषितवान्। पद्यस्य अन्ते तेन लिखितम् आसीत् –"शिरोविहीनं मङ्गलापुरसाम्राज्यं यत् शिरः प्राप्तुम् इच्छति तत् शिरः तु वराकस्य कवेः साहाय्याय आत्मसमर्पणं कर्तुम् उद्यतम् अस्ति, देशस्य हिताय आत्मानं बलिरूपेण अर्पयितुम् अपि सिद्धम् एव अस्ति तत्" इति।

मणिरत्नः एतत् पद्यम् अपठत्। क्षणकालं सः मौनेन अतिष्ठत्। 'अहं दुष्टविचारपिशाचेन आविष्टः सन् अग्रजस्य संहाराय प्रयतमानः अस्मि। अग्रजः तु सामान्यस्य कस्यचित् कवेः सन्तोषाय स्वस्य प्राणान् एव अर्पयितुम् अपि सिद्धः अस्ति। धिक् माम्। धिक् मम अविवेकिताम्' इति सः अचिन्तयत्। सः पश्चात्तापेन दग्धः जातः।

सः झटिति आज्ञापयत् – प्रयाणाय कश्चन अश्वः सज्जीक्रियताम् इति।

राजत्वप्राप्तेः अनन्तरं प्रथमवारं प्रासादात् बहिः गच्छन् अस्ति सः। निरायुधः सन् सः अरण्यं प्रति वेगेन अगच्छत्। श्मश्रूधारिणम् अग्रजं पादग्रहणपूर्वकं नमस्कृत्य क्षमां याचन् सः अवदत् – "अग्रज ! कश्चन कविः मयि विवेकम् अजागरयत्। भवान् यदा राजा आसीत् तदा भवतः मारणाय कुतन्त्रं रचयता मया मूर्खता आचरिता। भवतः शिरसः छेदाय मार्गं चिन्तयता मया अर्धराज्यदानम् उद्घोषयता अन्या अपि मूर्खता अनुष्ठिता। कृपया राजधानीं प्रत्यागत्य समग्रं राज्यं स्वीकरणीयम् इति मम नम्रा प्रार्थना। एतस्मिन् राज्ये सामान्यः जनः इव वासं कर्तुमपि मम नास्ति अधिकारः। कृपया क्षन्तव्यः अहम्" इति।

मणिरत्नः अग्रजं सानुरोधम् एवम् उक्त्वा तम् अश्वे उपवेश्य तस्य पृष्ठतः उपविश्य राजधानीं प्रति प्रस्थितवान्। राजरत्नस्य प्रत्यागमनवार्ता राजभवने विद्युत्सञ्चारम् अजनयत्। सवैभवं स्वागतं प्रवृत्तं तत्र। मणिरत्नः अग्रजं सादरम् आस्थानं नीत्वा राजमुकुटं तस्य शिरसि स्थापितवान्। स्वयं च तस्य पादमूले विनयेन उपविष्टवान्। जनानां नेत्राभ्यां निरन्तरं निर्गच्छति स्म आनन्दाश्रुधारा।

## प्रतिज्ञायौगन्धरायणम् ( ग्रन्थपरिचयः )

✍ **व्योम शाहः**

**अनुवर्तते**

महाकविभासप्रणीते प्रतिज्ञायौगन्धरायणे नाम्नि नाटकेऽस्मिन् एतावताऽस्माभिः दृष्टं यत् महासेनेन वत्सराजेन गृहीतः। भरतरोहकः तं निग्रहाद् विमुच्य राज्ञे समर्पयति। क्रमेण वत्सराजः उदयनः वासवदत्तां वीणावादनं शिक्षते क्रमेण तयोश्च प्रणयः भवति। यौगन्धरायणादयः वत्सराजं मोचयितुं प्रच्छन्नवेषेण समागताः। तत्र कदाचिद् विदूषकवचनेन ताभ्यां ज्ञायते यद् वत्सराजः वासवदत्तायां स्निह्यति।



एतत् श्रुत्वा यौगन्धरायणः स्वीये प्रपञ्चे आवश्यकानि परिवर्तनानि कुरुते येन सवासवदत्तम् उदयनं पलायितुं शक्नुयुः। स प्रतिज्ञां कुरुते यद् यदि सः घोषवतीं (वीणां) वासवदत्ताम् उदयनं च नाऽऽहरेत् तर्हि न स यौगन्धरायणः। एतत् निश्चित्य सर्वेऽपि भिन्नेभ्यः द्वारेभ्यः निर्गच्छन्ति।

चतुर्थाङ्कस्य प्रवेशके हास्यकरः भट-गात्रसेवकयोः संवादः प्रस्तुतः। अयं गात्रसेवकः परमार्थेन यौगन्धरायणस्य चारपुरुषः। स तत्र भटेन सह मत्तः इव वार्तालापं करोति। यदा वत्सराजस्य वासवदत्तया निर्गमनस्य वार्ता श्रूयते, तदा सः वेषम् अपहाय आत्मानं परिचाययति। स यौगन्धरायणस्य वीरतां प्रकटीकरोति। युद्धे प्रवृत्ते यौगन्धरायणस्य निग्रहः भवति। भटः वृत्तान्तं निवेदयितुम् अमात्यस्य पार्श्वे गच्छति।

अत्रान्तरे बद्धहस्तः यौगन्धरायणः प्रविशति। सः निर्भीकः कृतकृत्यंमन्यः च। सः भटान् कथयति यद् न कश्चिद् दर्शनाभिलाषी तैः रोद्धव्यः। ततः एकः भटः प्रविश्य तस्मै कथयति यद् वत्सराजः गृहीतः। सः न विश्वसिति। भटाः तम् आयुधागारे प्रवेशयन्ति प्रद्योतमन्त्री भरतरोहकश्च तत्र समागच्छति। यदा भरतरोहकः वत्सराजस्य वासवदत्तापहारं तस्करप्रवृत्तितया कथयति तदा यौगन्धरायणः कथयति यत् सः विवाहः एव। भरतरोहकः स्मारयति यत् पूर्वं तेन वत्सराजः निग्रहाद् मोचितः। तदनन्तरं तेन या प्रवृत्तिः कृता सा अयोग्या। यौगन्धरायणः प्रतिवक्ति यत् तस्य स्वामी प्रद्योतमपि निग्रहीतुमेकाकी एव समर्थः आसीत्। तयोः वार्तायां जायमानायां नेपथ्ये हाहारवः भवति। कञ्चुकीयः वृत्तान्तं विज्ञाय प्रविशति। महासेनपत्नी राज्ञी अङ्गारवती वासवदत्ताविवाहविषये शोकाकुला प्रासादात् पतितुकामा राज्ञा वारिता। तेन महासेनेन तदा वासवदत्तायाः विवाहः निश्चितः। तेनैव अन्तःपुरे आनन्दस्य रवः। नाटकस्य समाप्तिः भरतवाक्येन भवति—

**“भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु।**
**इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः॥”**

**( समाप्तम् )**

# मासवार्त्ता:

## आयोजितः प्रमाणपत्रवितरणकार्यक्रमः


















एकलव्य-संस्कृत-एकेडेमी बालानां कृते "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमं सञ्चालयति। कार्यक्रमेऽस्मिन् Skg तः आरभ्य ९ कक्ष्यायाः छात्राः आवर्षं सप्ताहे एकवारं रविवासरे संस्कृतभाषायाः अध्ययनं कुर्वन्ति। गतवर्षे ये छात्राः संस्कृतम् अपठन् तान् प्रोत्साहयितुं अगस्तमासस्य ३१ दिनाङ्के प्रमाणपत्रवितरणकार्यक्रमः आयोजितः आसीत्। कार्यक्रमेऽस्मिन् श्रीमतः हितेष-रावलमहोदयस्य (Advocate, H.M Rawal & Co, Ahmedabad) करकमलाभ्यां छात्रेभ्यः प्रमाणपत्रप्रदानम् अभवत्। प्रमाणपत्रं प्राप्य छात्राः आनन्दिताः आसन्। कार्यक्रमेऽस्मिन् विविधैः कार्यक्रमैः छात्राः स्वकीयां प्रतिभाम् अपि प्रदर्शितवन्तः।

## कृपया हसन्तु

**शिक्षकः- (रमणं प्रति) भोः रमण ! गृहे अभ्यासं करोषि वा ?**
**रमणः - आम् गुरो ! प्रतिदिनं द्वादशघण्टापर्यन्तम् अभ्यासं करोमि ।**
**शिक्षकः- कस्य अभ्यासं करोषि ?**
**रमणः - निद्राशास्त्रस्य ।**

★ ★ ★ ★ ★

**शिक्षकः- (नमनम् उद्दिश्य) हे रमण ! गृहकार्यं किमर्थं न कृतम् ।**
**रमणः - हे आचार्य ! मम लेखनी विश्रान्तिम् इच्छति स्म, अतः ।**

★ ★ ★ ★ ★

**नमनः - (शिक्षकं प्रति दूरभाषं कृत्वा) भोः महोदय ! अद्य अहं विद्यालयं न आगमिष्यामि ।**
**शिक्षकः- किमर्थम् ? किं जातम् ?**
**नमनः - मम दूरभाषे वारं वारं 'No-signal' इति लिखितम् आगच्छति । अहं चिन्तयामि मार्गेऽपि अद्य 'signal' न भवेत् अतः ।**

★ ★ ★ ★ ★

**शिक्षकः- (नमनं प्रति) भोः, कुतः अद्य पुनः विलम्बेन आगतः ?**
**नमनः - मार्गे लिखितम् आसीत् - 'शनैः गच्छन्तु' । अतः अहं विलम्बेन आगतवान् ।**
**शिक्षकः- भो मूर्ख ! तत् वाहनस्य कृते लिखितं भवति ।**
**नमनः - महोदय, छात्रः वाहनात् अपि शीघ्रं चलितुं शक्नोति किम् ?**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**विपत्तिष्वव्ययो धीरः नित्यमुत्थानवान् नरः ।**
**अप्रमत्तो विनीतात्मा नित्यं भद्राणि पश्यति ॥**

**तात्पर्यम्** – यः आपत्काले दुःखम् अनुभवन् धैर्येण तिष्ठेत्, सदा प्रगतिपथे अग्रे सरेत्, जागरूकः, विनीतश्च भवेत् सः सर्वदा मङ्गलमेव पश्यति।

**विरम विरसायासादस्माद्दुरध्यवसायतो विपदि महता धैर्यध्वंसं यदीदितुमीहसे ।**
**अयि जडविधे कल्पापायव्यपेतनिजक्रमाः कुशलशिखरिणं क्षुद्रा नैते न वा जलगशयः ॥**

**तात्पर्यम्** – महापुरुषाणां धीराणां धैर्यम् आपद्गते नष्टं भवति इति यदि द्रष्टुमिच्छति तर्हि तत् निश्चयं त्यक्तव्यमेव। युगान्ते स्थिरतया स्थिताः पर्वताः अगाधं समुद्रमपि नष्टं भवति। किन्तु धीराणां धैर्यं तथा न भवति। धीराः पर्वतवत् समुद्रवत् च तुच्छाः न भवन्ति।

**विरहोपि सङ्गमः खलु परस्परं सङ्गतं मनो येषाम् ।**
**यदि हृदयन्तु विघटितं समागमोऽपि विरहं विशेषयति ॥**

**तात्पर्यम्** – मनसां समञ्जनं यदि स्यात् तर्हि तेषां विरहः अपि (अहोरात्रस्मरणात्) सङ्गमः एव। किन्तु येषां हृदयानि विघटितानि सन्ति तेषां समागमः अपि विरहवत् दुःखदायकमेव भवति।

## ज्ञानसरित्

श्यामः पटेलः

**उन्नततमः कृत्रिमः उत्सः – 'जेदाह-फाउन्टेन' –**



बाल्ये माता पिता च अर्भकं नीत्वा यदा उद्यानं गच्छति तदा उत्सं दृष्ट्वा शिशुः आनन्दितः भवति । तस्मात् उत्सात् शिशोः उपरि आपतन्तः जलबिन्दवः तु रोमाञ्चं जनयन्ति इति प्रायः अस्माभिः सर्वैः दृष्टं वा स्वकीये बाल्ये अनुभूतं वा स्यात् । तादृशस्य लघोः उत्सस्य दर्शनेनापि वयं मुदिताः भवामः तर्हि द्वादशाधिकत्रिंशत्–मीटरमितं यावत् गच्छतः उत्सस्य दर्शनेन किं भविष्यति अस्माकम् !

मित्राणि ! साउदी–अरेबियायाः पश्चिमे जेदाहनगरस्य समुद्रतटे उत्सोऽयं ख्रिस्ताब्दस्य १९८० तमे वर्षे प्रस्थापितः । अतः 'जेदाह–फाउन्टेन' नाम्ना प्रसिद्धः जातः । अयमेव विश्वस्य उन्नततमः मानवनिर्मितः उत्सः वर्तते । एतस्य दर्शनं जेदाहनगरस्य सर्वस्मात् स्थानात् कर्तुं शक्यते । अस्य जलक्षेपकयन्त्रं तावत् शक्तम् अस्ति यत् ततः निःसृतः उत्सः प्रतिघण्टं ३७५ किलोमीटरमितस्य वेगेन उपरि गच्छति । तस्य जलस्य भारः प्रायः षोडश–टनमितः भवति । एषः उत्सः शुद्धपेयजलस्य स्थाने रक्तसमुद्रस्य क्षारयुक्तजलस्य उपयोगं करोति । समुद्रात् जलं स्वीकर्तुं यन्त्रस्य मुखे विशिष्टा जालिका अस्ति यया अवकरः नागच्छेत् । एतावत् भारवत् जलं यदा उपरि गत्वा अधः पतति तदा तस्य वेगं सोढुं विशिष्टपीठिकानां निर्माणं कृतमस्ति । रात्रौ यदा ५०० विद्युत्दीपकानां प्रकाशः उत्सस्य उपरि पतति तदा तु अस्य सौन्दर्यम् अनिर्वचनीयमिव भाति ।

उत्सः – Fountain, अर्भकः – Child

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **निलयः** | आवास | abode |
| **नकुलः** | नेवला | mungoose |
| **लोहितः** | लाल रंग | red color |
| **श्लेषः** | आलिंगन | embrace |
| **खचरः** | पक्षी | bird |
| **नलिका** | नली | tube |
| **व्यष्टिः** | वैयक्तिकता | individuality |
| **अवदातः** | शुक्ल | white |
| **हरिद्राभः** | पीतवर्ण | yellow |
| **उत्करः** | ढेर | heap |
| **मण्डलम्** | वृत्ताकार | circular |
| **श्वभ्रम्** | विवर | hole |
| **सुलभः** | सुलभ | easily available |
| **प्रद्योतनः** | सूर्य | Sun |
| **औषधीशः** | चन्द्र | moon |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कः जीवः यमराजस्य वाहनम् अस्ति ?**

(क) वृषभः (ख) महिषः (ग) गजः (घ) उष्ट्रः

**२ ) वैनतेयः कस्य देवस्य वाहनं वर्तते ?**

(क) विष्णोः (ख) शिवस्य (ग) गणेशस्य (घ) इन्द्रस्य

**३ ) सीताम् अपहृत्य गच्छता रावणेन सह केन युद्धं कृतम् ?**

(क) गृद्धेन (ख) उलूकेन (ग) कपोतेन (घ) मयूरेण

**४ ) एतेषु कः पक्षी शान्तेः प्रतीकं वर्तते ?**

(क) हंसः (ख) कपोतः (ग) काकः (घ) मयूरः

**५ ) एतेषु कः खगः स्वर्गलोकं प्रति गमनागमनं करोति ?**

(क) कोकिलः (ख) श्येनः (ग) गृद्धः (घ) काकः

**६ ) एतेषु कः खगः पत्रवाहकस्य कार्यं करोति स्म ?**

(क) गृद्धः (ख) कपोतः (ग) मयूरः (घ) श्येनः

**७ ) एतेषु कः पक्षी कार्त्तिकेयस्य वाहनम् अस्ति ?**

(क) काकः (ख) कपोतः (ग) मयूरः (घ) कोकिलः

उत्तराणि – (१) ख (२) क (३) क (४) ख (५) घ (६) ख (७) ग

# अस्माकम् आगामिकार्यक्रमाः

### रास-गरबा

रासेश्वर हे ! रासे रन्तुम्
सर्वं सज्जम्, आगच्छत्वम् ॥
रासयष्टिकां नीत्वा सर्वाः
समागतास्ते ग्वालबालिकाः
त्वत्सार्धं रासे ह्यनुगन्तुम्, रासेश्वर हे... ॥
शरदे सौम्या प्रकृतिरम्या
रम्यतरा मधुरैव पूर्णिमा
प्रार्थितस्त्वं मुदानुमन्तुम्, रासेश्वर हे... ॥
रासे रसिका राधा सज्जा
विलम्बे कथं ते न हि लज्जा
पोषय पोषय प्रीति-तन्तुम्, रासेश्वर हे... ॥

✍ डॉ. वासुदेव वि. पाठक : 'वागर्थः'

EKLAVYA SANSKRIT ACADEMY

# संस्कृत-गरबा

## निमन्त्रणम्

मान्याः,

एकलव्य-संस्कृत-एकेडेमीद्वारा आयोजिते संस्कृतगरबाकार्यक्रमे भवतां हार्दं स्वागतम् अस्ति । आगच्छन्तु, संस्कृतभाषायाः प्रचाराय आयोजिते एतस्मिन् विशिष्टे कार्यक्रमे उपस्थाय संस्कृतभाषायाः प्रचारकार्ये सहभागिनः भवेम ।

दिनाङ्कः - २८-०९-२०२५ रविवासरः,
समयः - रात्रौ ८.०० वादने आरम्भः

स्थलम्
कॉरहाउस, अपोलोसिटी-सेन्टर-होस्पिटल-समीपे,
परिमलगार्डनमार्गः, एलिसब्रिज, अहमदाबाद-३८०००६

निमन्त्रकः
डॉ. मिहिरः उपाध्यायः
निदेशकः, एकलव्य-संस्कृत-एकेडेमी,
अहमदाबाद

નોંધ: 'संस्कृतगरबा'માં પ્રવેશ વહેલા તે પહેલાનાં ધોરણે રજિસ્ટ્રેશનના માધ્યમથી જ આપવામાં આવશે. રજિસ્ટ્રેશન 'કોરહાઉસ'ના રિસેપ્શન પર કરાવી ગરબાના પાસ મેળવી લેવા. પાસ નિઃશુલ્ક રાખવામાં આવેલ છે.

નોંધ: સંસ્કૃત મિત્રો, પાર્કિંગની સમસ્યા નિવારવા ગરબા સ્થાને Two Wheeler, Auto, Cab અથવા Carpool કરીને આવવા વિનંતી.

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

### ग्राहक शुल्कम्

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006